# ॥ श्रीगायत्रीरामायणम् ॥

## || *Śrīgāyatrīrāmāyaṇam* ||

तपःस्वाध्याय निरतं तपस्वी वाग्विदां वरम् ।

नारदं परिपप्रच्छ वाल्मीकिर् मुनिपुङ्गवम् ॥

*tapaḥ svādhyāya nirataṁ tapasvī vāgvidāṁ varam|*
*nāradaṁ paripapraccha vālmīkir munipuṅgavam || 1*

स हत्वा राक्षसान् सर्वान् यज्ञघ्नान् रघुनन्दनः ।

ऋषिभिः पूजितः सम्यक् यथेन्द्रो विजयी पुरा ॥ २

*sa hatvā rākṣasān sarvān yajñaghnān raghunandanaḥ|*
*ṛṣibhiḥ pūjitaḥ samyak yatheendro vijayī purā || 2*

विश्वामित्रः स धर्मात्मा श्रुत्वा जनक भाषितम् ।

"वत्स! राम" धनुः पश्य ' इति राघव मब्रवीत् ॥ ३

*viśvāmitraḥ sa dharmātmā śrutvā janaka bhāṣitam|*
*" vatsa! rāma " dhanuḥ paśya ' iti rāghava mabravīt || 3*

तुष्टा वासस्य तदा वंशं  प्रविश्य स विशाम्पतेः ।

शयनीयं नरेन्द्रस्य तदासाद्य व्यतिष्ठत ॥ ४

*tuṣṭā vāsasya tadā vaṁśaṁ  praviśya sa viśāmpateḥ|*
*śayanīyaṁ narendrasya tadāsādya vyatiṣṣṭhata || 4*

वनवासं हि संख्याय वासां स्याभरणानि च ।

भर्तारं अनुगच्छन्त्यै सीतायै श्वसुरो ददौ ॥ ५

*vanavāsaṁ hi saṅkhyāya vāsāṁ syābharaṇāni ca|*
*bhartāram anugacchantyai sītāyai śvasuro dadau || 5*

राजा सत्यं च धर्मश्च राजा कुलवतां कुलम्।

राजा माता पिता चैव राजा हितकरो नृणाम्॥ ६

*rājā satyaṁ ca dharmaśca rājā kulavatāṁ kulam|*
*rāja mātā pitā caiva rājā hitakaro nṛṇām || 6*

निरीक्ष्य स मुहूर्तं तु ददर्श भरतो गुरुम्।

उटजे राम मासीनं जटा वल्कल धारिणम्॥७

*nirīkṣya sa muhūrtaṁ tu dadarśa bharato gurum |*
*uṭaje rāma māsīnaṁ jaṭā valkala dhāriṇam || 7*

यदि बुद्धिः कृता द्रष्टुं अगस्त्यं तं महा मुनिम्।

अद्यैव गमने बुद्धिं रोचयस्व महायशः॥ ८

*yadi buddhiḥ kṛtā draṣṭum agastyaṁ taṁ mahā munim|*
*adyaiva gamane buddhiṁ rocayasva mahāyaśaḥ || 8*

भरत स्यार्य पुत्रस्य श्वश्रूणां मम प्रभोः !।

मृगरूप मिदं व्यक्तं विस्मयं जनयिष्यति॥ ९

*bharata syārya putrasya śvaśrūṇāṁ mama prabhoḥ ! |*
*mṛgarūpa midaṁ vyaktaṁ vismayaṁ janayiṣyati || 9*

गच्छ शीघ्र मितो राम ! सुग्रीवं तं महाबलम्।

वयस्यं तं कुरु क्षिप्रं इतो गत्वाऽद्य राघव !॥ १०

*gaccha śīghra mito rāma ! sugrīvaṁ taṁ mahābalam |*
*vayasyaṁ taṁ kuru kṣipram ito gtvā'dya rāghava ! || 10*

देश कालौ प्रतीक्षस्व क्षममाणः प्रियाऽप्रिये।

सुख दुःख सहः काले सुग्रीव वशगो भव॥ ११

*deśa kālau pratīkṣasva kṣamamāṇaḥ priyā'priye*।
*sukha duḥkha sahaḥ kāle sugrīva vaśago bhava* ।। *11*

वन्द्या स्तेतु तपःसिद्धाः तपासा वीतकल्मषाः ।

प्रष्टव्या स्तेपि सीतायाः प्रवृत्तिर् विनयान्वितैः ॥ १२

*vandyā stetu tapaḥsiddhāḥ tapāsā vītakalmaṣāḥ* ।
*praṣṭavyā stepi sītāyāḥ pravṛttir vinayānvitaiḥ* ।। *12*

स निर्जित्य पुरीं श्रेष्ठां लङ्कां तां कामरूपिणीम् ।

विक्रमेण महातेजाः हनुमान् मारुतात्मजः ॥ १३

*sa nirjitya purīṁ śreṣṭhāṁ laṅkāṁ tāṁ kāmarūpiṇīm* ।
*vikrameṇa mahātejāḥ hanumān mārutātmajaḥ* ।। *13*

धन्या देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।

मम पश्यन्ति ये नाथं रामं राजीवलोचनम् ॥ १४

*dhanyā devāḥ sagandharvāḥ siddhāśca paramarṣayaḥ* ।
*mama paśyanti ye nāthaṁ rāmaṁ rājīvalocanam* ।। *14*

मङ्गळाभिमुखी तस्य सा तदासीन् महाकपेः ।

उपत स्थे विशालाक्षी प्रयता हव्यवाहनम् ॥ १५

*maṅgaḻābhimukhī tasya sā tadāsīn mahākapeḥ* ।
*upata sthe viśālākṣī prayatā havyavāhanam* ।। *15*

हितं महार्थं मृदुपूर्वसंहितं व्यतीत कालायति सम्प्रति क्षमम् ।

निशम्य तद्वाक्य मुपस्थित ज्वरः प्रसङ्गवा नुत्तर मेतदब्रवीत् ॥ १६

*hitaṁ mahārthaṁ mṛdupūrvasaṁhitaṁ*
*vyatīta kālāyati samprati kṣamam* ।
*niśamya tadvākya mupasthita jvaraḥ*
*prasaṅgavā nuttara metadabravīt* ।। *16*

धर्मात्मा राक्षसं श्रेष्ठः सम्प्राप्तोऽयम् विभीषणः ।
लङ्कैश्वर्यं ध्रुवं श्रीमा नयं प्राप्नो त्यकण्टकम् ॥ १७

*dharmātmā rākṣasaṁ śreṣṭhaḥ samprāpto'yam vibhīṣaṇaḥ* ।
*laṅkaiśvaryaṁ dhruvaṁ śrīmā nayaṁ prāpno tyakaṇṭakam*।। *17*

यो वज्र पाताशनि सनीपातात् न चक्षुभे नापि चचाल राजा ।
स रामबाणाभिहतो भृशार्तः चचाल चापं च मुमोच वीरः ॥ १८

*yo vajra pātāśani sanīpātāt na cakṣubhe nāpi cacāla rājā* ।
*sa rāmabāṇābhihato bhṛśārrtaḥ cacāla cāpaṁ ca mumoca vīraḥ* ।। *18*

यस्यविक्रम मासाद्य  राक्षसां निधनं गताः ।
तं मन्ये राघवं वीरं  नारायण मनामयम् ॥ १९

*yasya vikrama māsādya rākṣasā nidhanaṁ gatāḥ* ।
*taṁ manye rāghvaṁ vīraṁ nārāyaṇa manāmayam* ।। *19*

नते ददृशिरे रामं  दहन्त  मरिवाहिनीम् ।
मोहिताः परमास्त्रेण  गान्धर्वेण महात्मना ॥ २०

*nate dadṛśire rāmaṁ dahanta marivāhinīm* ।
*mohitāḥ paramāstreṇa gāndharveṇa mahātmanā* ।। *20*

प्रणम्य देवताभ्यश्च ब्राण्येभ्य श्च मैथिली।

बद्धांजलि पुटा चेद मुवा चाग्नि समीपतः॥ २१

*praṇamya devatābhyaśca brāṇyebhya śca maithilī*।
*baddhāñjali puṭā ceda muvā cāgni samīpataḥ* ।। 21

चलना त्पर्वतेन्द्रस्य गणा देवा श्च कम्पिताः।

चचाल पार्वती चापि तदा श्लिष्टा महेश्वरम्॥ २२

*calanā tparvatendrasya gaṇā devā śca kampitāḥ* ।
*cacāla pārvatī cāpi tadā śliṣṭā maheśvaram* ।। 22

दाराः पुत्राः पुरं राष्ट्रं भोगाच्छादन भाजनम्।

सर्वमेवाविभक्तं नो भविष्यति हरीश्वर !॥ २३

*dārāḥ putrāḥ puraṁ rāṣṭraṁ bhogācchādana bhājanam* ।
*sarvamevāvibhaktaṁ no bhaviṣyati harīśvara !* ।। 23

यामेव रात्रिं शत्रुघ्नः पर्णशालां समाविशत्।

तामेव रात्रिं सीतापि प्रसूता दारकद्वयम्॥ २४

*yāmeva rātriṁ śatrughnaḥ parṇaśālāṁ samāviśat* ।
*tāmeva rātriṁ sītāpi prasūtā dārakadvayam* ।। 24

इदं रामायणं कृत्स्नं गायत्री बीज संयुक्तम्।

त्रिसन्ध्यं यः पठेन्नित्यं सर्वपापैः प्रमुच्यते॥

*idaṁ rāmāyaṇaṁ kṛtsnaṁ gāyatrī bīja saṁyuktam* ।
*trisandhyaṁ yaḥ paṭhennityaṁ sarvapāpaiḥ pramucyate* ।।